শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ দ্বিষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্ৱিষষ্টিতমঃ সর্গঃ ॥

## কুম্ভকর্ণস্য রাৱণগৃহে প্রৱেশো রামাদ্ ভযং সূচযিৎৱা রাৱণেন তস্য শত্রুসেনাসংহরণায প্রেষণম্

স তু রাক্ষসশার্দূলো নিদ্রামদসমাকুলঃ।
রাজমার্গং শ্রিযা জুষ্টং যযৌ ৱিপুলৱিক্রমঃ॥ **6.62.1** ॥

রাক্ষসানাং সহস্রৈশ্চ ৱৃতঃ পরমদুর্জযঃ।
গৃহেভ্যঃ পুষ্পৱর্ষেণ কীর্যমাণস্তদা যযৌ॥ **6.62.2** ॥

স হেমজালৱিততং ভানুভাস্ৱরদর্শনম্।
দদর্শ ৱিপুলং রম্যং রাক্ষসেন্দ্রনিৱেশনম্॥ **6.62.3** ॥

স তত্তদা সূর্য ইৱাভ্রজালং
প্রৱিশ্য রক্ষোধিপতের্নিৱেশম্।
দদর্শ দূরেঽগ্রজমাসনস্থং
স্ৱযম্ভুৱং শক্র ইৱাসনস্থম্॥ **6.62.4** ॥

ভ্রাতুঃ স ভৱনং গচ্ছন্ রক্ষোগণসমন্ৱিতঃ।
কুম্ভকর্ণঃ পদন্যাসৈরকম্পযত মেদিনীম্॥ **6.62.5** ॥

সোঽভিগম্য গৃহং ভ্রাতুঃ কক্ষ্যামভিৱিগাহ্য চ।
দদর্শোদ্ৱিগ্নমাসীনং ৱিমানে পুষ্পকে গুরুম্॥ **6.62.6** ॥

অথ দৃষ্টৱা দশগ্রীৱঃ কুম্ভকর্ণমুপস্থিতম্।
তূর্ণমুত্থায সংহৃষ্টঃ সন্নিকর্ষমুপানযৎ॥ **6.62.7**॥

অথাসীনস্য পর্যঙ্কে কুম্ভকর্ণো মহাবলঃ।
ভ্রাতুর্ৱৱন্দে চরণৌ কিং কৃত্যমিতি চাব্রৱীৎ॥ **6.62.8**॥

উৎপত্য চৈনং মুদিতো রাৱণঃ পরিষস্ৱজে।
স ভ্রাত্রা সম্পরিষ্ৱক্তো যথাৱচ্চাভিনন্দিতঃ॥ **6.62.9**॥

কুম্ভকর্ণঃ শুভং দিৱ্যং প্রতিপেদে ৱরাসনম্।
স তদাসনমাশ্রিত্য কুম্ভকর্ণো মহাবলঃ॥ **6.62.10**॥

সংরক্তনযনঃ ক্রোধাদ্ রাৱণং ৱাক্যমব্রৱীৎ।
কিমর্থমহমাদৃত্য ৎৱযা রাজন্ প্রবোধিতঃ॥ **6.62.11**॥

শংস কস্মাদ্ ভযং তেঽত্র কো ৱা প্রেতো ভৱিষ্যতি।
ভ্রাতরং রাৱণঃ ক্রুদ্ধং কুম্ভকর্ণমৱস্থিতম্॥ **6.62.12**॥

রোষেণ পরিৱৃত্তাভ্যাং নেত্রাভ্যাং ৱাক্যমব্রৱীৎ।
অদ্য তে সুমহান্ কালঃ শযানস্য মহাবল॥ **6.62.13**॥

সুষুপ্তস্ত্ৱং ন জানীষে মম রামকৃতং ভযম্।
এষ দাশরথিঃ শ্রীমান্ সুগ্রীৱসহিতো বলী॥ **6.62.14**॥

সমুদ্রং লঙ্ঘযিৎৱা তু মূলং নঃ পরিকৃন্ততি।
হন্ত পশ্যস্ৱ লঙ্কাযাং ৱনান্যুপৱনানি চ॥ **6.62.15**॥

সেতুনা সুখমাগত্য ৱানরৈকার্ণৱং কৃতম্।
যে রাক্ষসা মুখ্যতমা হতাস্তে ৱানরৈর্যুধি॥ **6.62.16**॥

ৱানরাণাং ক্ষযং যুদ্ধে ন পশ্যামি কথঞ্চন।
ন চাপি ৱানরা যুদ্ধে জিতপূর্ৱাঃ কদাচন॥ **6.62.17**॥

তদেতদ্ ভযমুৎপন্নং ত্রাযস্বেহ মহাবল।
নাশয ৎৱমিমানদ্য তদর্থং বোধিতো ভৱান্॥ **6.62.18**॥

সর্ৱক্ষপিতকোশং চ স ৎৱমভ্যুপপদ্য মাম্।
ত্রাযস্বেমাং পুরীং লঙ্কাং বালৱৃদ্ধাৱশেষিতাম্॥ **6.62.19**॥

ভ্রাতুরর্থে মহাবাহো কুরু কর্ম সুদুষ্করম্।
মযৈৱং নোক্তপূর্ৱো হি ভ্রাতা কশ্চিৎ পরন্তপ॥ **6.62.20**॥

ৎৱয্যস্তি মম চ স্নেহঃ পরা সম্ভাৱনা চ মে।
দেৱাসুরেষু যুদ্ধেষু বহুশো রাক্ষসর্ষভ॥ **6.62.21**॥

ৎৱযা দেৱাঃ প্রতিৱ্যূহ্য নির্জিতাশ্চাসুরা যুধি॥ **6.62.22**॥

তদেতৎ সর্ৱমাতিষ্ঠ ৱীর্যং ভীমপরাক্রম।
নহি তে সর্ৱভূতেষু দৃশ্যতে সদৃশো বলী॥ **6.62.23**॥

কুরুষ্ৱ মে প্রিযহিতমেতদুত্তমং
যথাপ্রিযং প্রিযরণ বান্ধৱপ্রিয।
স্বতেজসা ৱ্যথয সপত্নৱাহিনীং
শরদ্ঘনং পৱন ইৱোদ্যতো মহান্॥ **6.62.24**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে দ্বিষষ্টিতমঃ সর্গঃ॥